नारायणीति विख्याता विष्णुमाया सनातनी ॥
महालक्ष्मीस्वरूपा च वेदमाता सरस्वती ।
राधा वसुन्धरा गङ्गा तासां स्वामी च माधवः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अध्यायः ॥
( यथा, महाभारते । ५ । ७० । ४ ।
"मौनाद्ध्यानाच्च योगाच्च विद्धि भारत ! माधवम् ।")

तन्नाममाहात्म्यं यथा,—
ओमित्येकाक्षरे मन्त्रे स्थितः सर्व्वगतो हरिः ।
माधवायेति वै नाम धर्म्मकामार्थमोक्षदम् ॥"
इति वह्निपुराणम् ॥

(मधोर्वसन्तस्यायम् मधूनि मधुमन्ति कुसुमानि अस्मिन् वा । मधु + "मधोर्ञ्च ।" ४ । ४ । १२९ । इति ञः ।) वैशाखमासः । इत्यमरः । १ । ४ । १६ ॥ (यथा, मार्कण्डेये । ११७।२७ ।
"स तेन सख्या सहितो जगामाम्रवणं वनम् ।
पत्नीभिः स समं रन्तुं माधवे मासि पार्थिव ! ॥"
(मधु + स्वार्थे अण् ।) वसन्तः । इति विश्वः ॥ ( यथा, सुश्रुते । १ । १९ । ९ । "मधुमाधवौ वसन्तः ।"
"माधवप्रथमे मासि नभस्यप्रथमे पुनः ॥"
इति चरके सूत्रस्थाने सप्तमेऽध्याये ॥
"माधवनभस्यसहस्यानां यथासंख्यं वैशाखभाद्रपौषाणां सुश्रुतेऽभिहितत्वात् तेषां प्रथमेऽग्रेऽग्रवर्त्तिनि मासि चैत्रादौ विषय इति निष्कर्षः । इति चरकटीकाकृदभिप्रायः ॥)
मधुकवृक्षः । कृष्णमुद्गः । इति राजनिर्घण्टः ॥ ( भौत्यमन्वन्तरीयसप्तर्षीणामन्यतम ऋषिविशेषः । यथा, मार्कण्डेये । १०० । ३१ ।
"अग्नीध्रश्चाग्निबाहुश्च शुचिर्मुक्तोऽथ माधवः ।
शुक्रोऽजितश्च सप्तैते तदा सप्तर्षयः स्मृताः ॥"
सायनाचार्य्यस्य भ्राता । यथा, सायनकृतधातुवृत्तौ । इति पूर्व्वदक्षिणपश्चिमसमुद्राधीश्वरकम्पराजसुतसङ्गमराजमहामन्त्रिणा सायनपुत्रेण माधवसहोदरेण सायनाचार्य्येण विरचिता माधवीया धातुवृत्तिः ॥ )

माधविका, स्त्री, ( माधवी + कन् टाप् । पूर्व्वह्रस्वश्च ।) माधवीलता । इत्यमरटीकायां भरतः ॥

माधवी, स्त्री, (मधौ साधुपुष्प्यति । मधु + "कालात् साधुपुष्प्यत्पच्यमानेषु ।" ४ । ३ । ४३ । इत्यण् । ङीप् । ) स्वनामख्यातपुष्पलता । तत्पर्य्यायः । अतिमुक्तः २ पुण्ड्रकः ३ वासन्ती ४ लता ५ । इत्यमरः । २ । ४ । ७२ ॥ अतिमुक्तकः ६ माधविका ७ माधवीलता ८ । इति तट्टीकायां भरतः ॥ चन्द्रवल्ली ९ सुगन्धा १० भ्रमरोत्सवा ११ भृङ्गप्रिया १२ भद्रलता १३ भूमिमण्डपभूषणा १४ वसन्तीदूती १५ । इति जटाधरः ॥ लतामाधवी १६ । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । १ । १२ । ७ ।
"आम्रैर्नीपैर्मधूकैश्च माधवीमण्डपावृताम् ।")
अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । कषायत्वम् । मदगन्धित्वम् । पित्तकासव्रणदाहशोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"माधवी स्यात्तु वासन्ती पुण्ड्रको मण्डकोऽपि च ।
अतिमुक्तो विमुक्तश्च कामुको भ्रमरोत्सवः ॥
माधवी मधुरा शीता लघ्वी दोषत्रयापहा ।"
इति भावप्रकाशः ॥
मिश्रिः । मधुशर्करा । कुट्टनी । (मधुनो विकार इत्यण् ङीप् ।) मदिरा । इति मेदिनी । वे, ४६—४७ ॥ (यथा, महाभारते । ४ । १५ । ३ ।
"अस्ति मे शयनं दिव्यं त्वदर्थमुपकल्पितम् ।
एहि तत्र मया सार्द्धं पिबस्व मधुमाधवीम् ॥"
माधवस्येयमित्यण् ङीप् । तत्प्रियत्वात्तथात्वम् ।) तुलसी । इति शब्दमाला ॥ (मधौ वसन्ते सेवार्च्चनीयेति अण् ।) दुर्गा । इति शब्दरत्नावली ॥ माधवस्य पत्नी च ॥ (मधुवंशजा कन्या । यथा, महाभारते । १।९५।१२ । 'जनमेजयः खल्वनन्तां नामोपयेमे माधवीं तस्यामस्य जज्ञे प्राचिन्वान् ॥')

माधवीलता, स्त्री, ( माधव्याख्या लता ।) स्वनामख्यातपुष्पलता । इत्यमरटीकायां भरतः ॥

माधवेष्टा, स्त्री, (माधवस्य इष्टा ।) वाराहीकन्दः । इति राजनिर्घण्टः ॥

माधवोचितं, क्ली, ( माधवस्योचितम् । सुगन्धित्वात् तथात्वम् । ) कक्कोलकम् । इति राजनिर्घण्टः ॥ ( विशेषोऽस्य कक्कोलशब्दे ज्ञातव्यः ॥ )

माधवोद्भवः, पुं, (माधवादुद्भवोऽस्य । ) राजादनी । इति राजनिर्घण्टः ॥

माधुकः, पुं, वर्णसङ्करजातिविशेषः । इति जटाधरः ॥ ( यथा, महाभारते । १३ । ४८ । २० ।
"मैरेयकञ्च वैदेहः सम्प्रसूतेऽथ माधुकम् ॥")

माधुमताः, पुं, ( मधुमत्सु भवाः । मधुमत् + "कच्छादिभ्यश्च ।" ४ । २ । १३३ । इत्यण् ।) काश्मीरदेशभवाः । इति हेमचन्द्रः ।४।२४॥

माधुरं, क्ली, ( मधु अस्ति अस्य अस्मिन् वेति । मधु + "ऊषसुषिमुष्कमधो रः ।" ५।२।१०७। इति रः । ततः स्वार्थेऽण् ।) मल्लिका । इति त्रिकाण्डशेषः ॥ ( मधुरात् सम्भवतीत्यण् । ) मधुरसम्भवे, त्रि ॥

माधुरी, स्त्री, ( माधुर + गौरादित्वात् ङीष् । ) मद्यम् । इति भूरिप्रयोगः ॥ माधुर्य्यम् । यथा,
"तानि स्पर्शसुखानि ते च तरलाः स्निग्धा दृशोर्विभ्रमा-
स्तद्वक्त्राम्बुजसौरभं स च सुधास्यन्दी गिरां वक्रिमा ।
सा बिम्बाधरमाधुरीति विषयासङ्गेऽपि चेन्मानसं
तस्यां लग्नसमाधि हन्त विरहव्याधिः कथं वर्द्धते ॥"
इति गीतगोविन्दे ३ सर्गः ॥

माधुर्य्यं, क्ली, ( मधुरस्य भावः । मधुर + "वर्णदृढादिभ्यः ष्यञ् च ।" ५।१।१२३ । इति ष्यञ् । ) मधुरस्य भावः । मधुरत्वम् । इति हेमचन्द्रः । ३ । १७३ । ( यथा, सुश्रुते सूत्रस्थाने एकादशाध्याये ।
"माधुर्य्यं भजतेऽत्यर्थं तीक्ष्णभावं विमुञ्चति ॥")
लावण्यम् । यथा,—
"रूपं किमप्यनिर्व्वाच्यं तनोर्माधुर्य्यमुच्यते ।"
इत्युज्ज्वलनीलमणिः ॥
पाञ्चालीरीतिविशिष्टकाव्यगुणः । यथा,—
"मधुरां सुकुमाराञ्च पाञ्चालीं कवयो विदुः ।"
इति साहित्यदर्पणे ९ परिच्छेदः ॥ तस्य लक्षणं यथा, साहित्यदर्पणे ८ परिच्छेदे ।
"चित्तद्रवीभावमयो ह्लादो माधुर्य्यमुच्यते ।
सम्भोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात् ॥
मूर्द्ध्नि वर्गान्त्यवर्णेन युक्ताष्टठडढान् विना ।
रणौ लघु च तद्व्यक्तौ वर्णाः कारणतां गताः ॥
अवृत्तिरल्पवृत्तिर्वा मधुरा रचना तथा ।"
( नायिकानामयत्नजोऽलंकारविशेषः । यथा, साहित्यदर्पणे । ३ । १२९ ।
"सङ्क्षोभेष्वप्यनुद्वेगो माधुर्य्यं परिकीर्त्तितम् ।"
सात्त्विकनायकगुणभेदः । यथा, तत्रैव ।३।६१।
"सर्व्वावस्थाविशेषेषु माधुर्य्यं रमणीयता ।")

माध्यन्दिनं, त्रि, (मध्ये भवम् । मध्य + "अन्तःपूर्व्वपदात् ठञ् ।" ४।३।६० । इत्यत्र काशिकासूत्रवृत्तौ "मध्योमध्यं दिनण् चास्मात् ।" इति दिनण् ।) मध्यमम् । इति हेमचन्द्रः । ६ । ९६ ॥ ( मध्यन्दिनसम्बन्धि । यथा, ऋग्वेदे । ३ । २८ । ४ ।
"माध्यन्दिने सवने जातवेदः पुरोडाशमिह कवे ! जुषस्व ।"
"माध्यन्दिने मध्यन्दिनसम्बन्धिनि" तथा "माध्यन्दिने मध्यं दिनस्येदमित्यर्थे उत्सादित्वादञ् ञित्वादादिवृद्धिः ञित्वादेवाद्युदात्तत्वम् ।" इति च तद्भाष्ये सायनः ॥ मध्यन्दिनेन प्रोक्ताधीता वा । इत्यण् ङीप् । शुक्लयजुर्वेदस्य शाखाभेदः । यथा, आश्वलायनीयश्रौतसूत्रे । ५ । ५ । १९ ।
"पिबा सोममभियमुग्रतर्द इति तिस्रोऽर्वाङेहि सोमकामं त्वाहुरित्वयं सोमस्त्वमेह्यर्वाङिन्द्राय सोमाः प्र दिवो विदाना आ पूर्णो अस्य कलशः स्वाहेति माध्यन्दिन्यः ।")

माध्यमं, त्रि, (मध्ये भवं । मध्य + "अन्तःपूर्व्वपदाट्ठञ् ।" ४ । ३ । ६० । इत्यस्य काशिकासूत्रवृत्तौ "मण्मीयौ च प्रत्ययौ वक्तव्यौ ।" इति मण् ।) मध्ये भवम् । यथा,—
"मध्यमं माध्यमं मध्यमीयं माध्यन्दिनञ्च तत् ।"
इति हेमचन्द्रः । ६ । ९६ ॥

माध्यस्थ्यं, क्ली, ( मध्यस्थ + ष्यञ् । ) मध्यस्थस्य भावः । मध्यस्थकरणम् । यथा, कुमारसम्भवे । १ । ५२ ।
"अयाचितारं नहि देवदेवमद्रिः सुतां ग्राहयितुं शशाक ।